**Reg. No. : ....................................**

**Name : .......................................**

**Code No. 5045**

**Second Year – March 2017**

Time : 2½ Hours
Cool-off time : 15 Minutes

Part – III

## SANSKRIT SAHITYA

Maximum : 80 Scores

***General Instructions to Candidates :***

- There is a 'cool-off time' of 15 minutes in addition to the writing time of 2½ hrs.
- You are not allowed to write your answers nor to discuss anything with others during the 'cool-off time'.
- Use the 'cool-off time' to get familiar with questions and to plan your answers.
- Read questions carefully before answering.
- All questions are compulsory and only internal choice is allowed.
- When you select a question, all the sub-questions must be answered from the same question itself.
- Electronic devices except non-programmable calculators are not allowed in the Examination Hall.

**निर्देशा** :

1. **सर्वे** प्रश्ना: समाधेया: ।
2. प्रश्नान् प्रश्ननिर्देशान् च सावधानं पठित्वा उत्तरं लिखत ।
3. प्रश्नानां वाचनाय **15** निमेषा: अधिकतया कल्पिता: ।

1. (1) कोष्ठकात् उचितम् उत्तरं निर्धार्य लिखत ।

‘प्रविश्य वैकुण्ठमिवाप निर्वृतिम्’ । कः निर्वृतिं अवाप ?

(कृष्णः, कुचेलः, सान्दीपनिः) **(Score : 1)**

(2) अधः प्रदत्तं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।

भक्तेषु भक्तेन स <u>मानितस्त्वया</u>

पुरीं वसन्नेकनिशां महासुखम् ।

बतापरेद्युर्द्रविणं विना ययौ

विचित्ररूपस्तव <u>खल्वनुग्रहः</u> ।।

(क) अधो रेखाङ्कितयोः पदयोः एकस्य पदच्छेदं कुरुत । **(Score : 1)**

(ख) अपरेद्युः द्रविणं विना ययौ । कः ? **(Score : 1)**

(ग) भगवदनुग्रहः कीदृशः ? **(Score : 1)**

(घ) अस्य श्लोकस्य सारांशं लिखत । **(Scores : 2)**

2. (1) अतनुत कुहनामानुषो मौनमुद्राम् । कुहनामानुषः कः ?

(अर्जुनः, ब्राह्मणः, श्रीकृष्णः) **(Score : 1)**

(2) सन्तानगोपालमिति चम्पूकाव्यं तत्कर्तारञ्च अधिकृत्य लघुटिप्पणीं लिखत । **(Scores : 5)**

3. (1) पदलालित्यम् उपमाप्रयोगचातुर्यम् अर्थगौरवम् इति त्रयः गुणाः कस्मिन् सन्ति ?

(श्रीहर्षेः, माघे, भासे) **(Score : 1)**

(2) कोष्ठकात् उचितम् उत्तरं निर्धार्य लिखत ।

श्रीहर्षस्य जीवितकालम्

(नवशतकम्, विंशतिशतकम्, द्वादशशतकम्) **(Score : 1)**

(3) सूचनानुसारं बृहत्त्रयीमधिकृत्य निबन्धमेकं लिखत ।

त्रय: कृतय: ।

एतेषां कर्तार: ।

एतेषां काव्यानां वैशिष्ट्यानि । **(Scores : 8)**

(4) "लक्ष्मीपदलाञ्छन:" इति बहुमति: लब्धा । कस्य ?

(भारवे:, माघस्य, कालिदासस्य) **(Score : 1)**

(5) अधोदत्तं श्लोकं स्ववाक्यै: विशदयत ।

यावद्भा भारवेर्भाति
तावन्माघस्य नोदय: ।
उदिते नैषधे काव्ये
F माघ: F च भारवि: ।। **(Scores : 5)**

4. (1) श्वेतकेतो: वदनं के न दीप्तम् अभवत् ?

(गर्वेण, विनयेन, धैर्येण) **(Score : 1)**

(2) अधोलिखितानि वाक्यानि काव्यक्रमानुसारं संयोज्य पुनर्लिखत ।

पुत्रं पठितव्यं न पठितमिति दृष्ट्वा उद्दालक: तीर्थकुले गुरुशुश्रूषाय तं पुनरपि प्राहिणोत् । उपचारान् परिगृह्य श्वेतकेतु: पितरम् उपेत्य अनमत् । पिता तम् अन्वगृहीत् । गृहं प्रत्यागतं तं विनयसम्पन्नं वीक्ष्य पिता आनन्दम् अविन्दत । तत्र अजपरिपालनेन प्रीतमानस: गुरु: तम् अनुजग्राह ।। **(Scores : 5)**

(3) श्वेतकेतो: गुरो: च भाषणे रिक्तस्थानानि पूरयतु ।

श्वेतकेतु: – गुरो ! मम पिता "पुत्र ! पठितव्यं त्वया न पठितम्" इत्युवाच ।

गुरु: – अजपरिपालनाय __________ ।

श्वेतकेतु: – गुरो ! अहं प्रत्यागतोऽस्मि ।

गुरु: – अहं तव दर्शनेन _______ ।

श्वेतकेतु: – धन्योऽस्मि ।

गुरु: – स्वस्त्यस्तु । पितु: सकाशं _________ । **(Scores : 3)**

5. मृच्छकटिकं नाम नाटके चारुदत्तमैत्रेययो: मिथोभाषणं संगृह्य लिखत । **(Scores : 5)**

6. (1) असौ मोहन: अनर्घवचोभि: निजजनान् बहुधा अचोदयत् । असौ क: ?

(मुतुकुलं श्रीधर:, महात्मागान्धि:, बालगंगाधरतिलक:) **(Score : 1)**

(2) अधोदत्तस्य श्लोकस्य आस्वादनटीकां लिखत ।

पान्थवेश्मानि च भोजनगृहे

पार्थवर्गरहितत्वमुपेता: ।

कीर्तनीयगुणिनो वयमार्ता:

मूर्तिमत्वमथवा किमु गर्ह्यम् ।। **(Scores : 4)**

7. (1) नोबल्पुरस्कारेण सम्मानितं काव्यमस्ति –

(नवभारतम्, गीतगोविन्दम्, गीताञ्जलि:) **(Score : 1)**

(2) अधोनिर्दिष्टस्य आशयस्य उचितं वाक्यं प्रदत्तेभ्य: चित्वा लिखत ।

आशय: - सदा निस्सारेषु कर्तव्येषु अपि जागर्तुं शक्तिं मम देहि ।

उपरि मनश्च समुन्नयितुं शक्तिं मम देहि ।

यान्यल्यान्यपि कार्याण्यनुदिनमापतितानि

कर्तुं शक्तिं मम देहि ।

भवदिङ्गितमनुवशयितुं शक्तिं मम देहि । **(Score : 1)**

(3) अधोदत्तेषु भवतः इष्टतमः श्लोकः कः ? किं कारणम् ?

सततविसृत्वरचिन्तनकर्मसु

पुरतो नयसे यत्र मनस्त्वम् ।

स्वातन्त्र्यस्य स्वर्गे तस्मिन्

प्रबुध्येत पितर्मम राष्ट्रम् ।।

अथ प्रार्थनमेतत् त्वां प्रति

मामकमस्ति विभो ।

प्रहर प्रहर निदाने मम

हृदि दारिद्र्यस्येति ।।

यथा कदाचन कमपि न दीनं

जहामि नापि यथा ।

नमामि दृप्तां प्रभुतां च तथा

शक्तिं मम देहि ।। **(Scores : 4)**

8. (1) प्रत्युज्जगाम अतिथिम् आतिथेयः । अत्र प्रत्युज्जगाम इति पदस्य अर्थः कः ?

(अगच्छत्, आजगाम, स्वीचकार) **(Score : 1)**

(2) स मे तां भक्तिमेवागणयत् पुरस्तात् ।

कः भक्तिमेव पुरस्तादगणयत् ?

(वरतन्तुः, कौत्सः, रघुः) **(Score : 1)**

(3) यथोचितं योजयत ।

| क | | ख |
|---|---|---|
| माघः | - | महर्षिः |
| साकेतम् | - | दक्षिणा |
| रघुः | - | महाकविः |
| वरतन्तुः | - | अयोध्या |
| गुर्वर्थम् | - | राजा |

**(Scores : 5)**

(4) रघुः कौत्सश्च कथं अभिनन्दनयोग्यौ अभूताम् ?

सूचनानुसारं लिखत ।

**सूचना** : वरतन्तुः उवाच – चतस्रः दश च आहर ।

मे परीवादनवावतारः मा भूत् ।

कुबेरात् अर्थं निष्क्रष्टुं चकमे ।

नभस्तः पतितां हिरण्मयीं वृष्टिं शशंसुः ।

कौत्साय समस्तमेव दिदेश । **(Scores : 8)**

9. अधः प्रदत्तं गद्यभागं प्रादेशिकभाषायां परिवर्तयत ।

सोऽयं सम्प्रति चतुर्दशीति भगवन्तं भवानीपतिमुपासितुमागतः । इयञ्च पारिजातकुसुममञ्जरी रूपातिशयबद्धादरया मार्गसङ्गतया नन्दनवनदेवतया समर्पिता अनिच्छतोऽव्यस्य मया कर्णपूरीकृता इति ।।

**(Scores : 3)**

10. (1) "अनौचित्यादृते नान्यद् रसभंगस्य कारणम्" ।

केन एवम् उक्तम् ?

(कुन्दकेन, क्षेमेन्द्रेण, भामहेन) **(Score : 1)**

(2) अधोदत्तासु पद्धतिषु एकं विशदयत ।

ध्वनिपद्धतिः ।

रसपद्धतिः ।

रीतिपद्धतिः । **(Scores : 3)**

(3) यथोचितं योजयत ।

| क | ख |
|---|---|
| भामहः | रीतिरात्मा काव्यस्य । |
| वामनः | काव्यं ग्राह्यमलंकारात् । |
| विश्वनाथः | काव्यस्यात्मा ध्वनिः । |
| कुन्तकः | वाक्यं रसात्मकं काव्यम् । |
| आनन्दवर्धनः | वक्रोक्तिः काव्यजीवितम् । |

**(Scores : 5)**